श्रीवेदसाराख्यपरमदिव्यशिवसहस्रनामस्तोत्रम्

श्रीव्यास उवाच

एकदा मुनयः सर्वे द्वारकां द्रष्टुमागताः ।
वाशुदेवं च सोत्कण्ठाः कृष्णदर्शनलालसाः ॥१॥
ततस्तु भगवान् प्रीतः पूजां चक्रे यथाविधि ।
तेषामासींस्ततो गृह्य बहुमानपुरः सरम् ॥२॥
तैः पृष्ठः कथायामास कुमारप्रभृतं च यत् ।
चरित्रं भुमिभारघ्नं लोकानन्दकरं परम् ॥३॥
मार्कण्डेयमुखाः सर्वे माध्यान्हिकक्रियोत्थितः ।

कृष्णः स्नानमथो चक्रे मृदक्षतकुशादिभिः ॥४॥
सूर्योपस्थानसंन्ध्यां च स्मृतिर्धर्ममनुस्मरन् ।
शिवपूजां ततः कृष्णो गन्धपुष्पाक्षतादिभिः ५॥
चकार विधिवद्भक्त्या नमस्कारयुतां शुभाम् ।
जय शंकर सोमेश रक्ष रक्षेति चाब्रवीत् ॥६॥
जजाप शिवसहस्रं भुक्तिमुक्तिप्रदं विभो ।
अनन्यमानसः शांतः पद्मासनपरः शुचिः ॥७॥
ततस्ते विस्मयापन्ना दृष्ट्वा कृष्णविचेष्टितम् ।
मार्कण्डेयोऽवदत् कृष्णं बहुशो मुनिपुङ्गवः ॥८॥

मार्कण्यय उवाच

त्वं विष्णुः कमलाकान्तः परमात्मा जगत्गुरुः ।
तव पूज्यः कथं शम्भुरेतत्सर्वं वदस्व मे ॥९॥

श्रीब्यास उवाच

अथ ये मुनयः सर्वे मार्कण्ययं समर्चयन् ।
वचोभिवासुदेवस्य पृष्टं साधु त्वयेति च ॥१०॥

श्रीकृष्ण उवाच

साधु साधु मुने पृष्ठं हिताय सकलस्य च ।
अज्ञातं तव नास्त्येव तथापि च वदाम्यहम् ॥११॥

दैवतं सर्वदेवानां सर्वकारणकारणम् ।
ज्योतिर्यत्परमानन्दं सावधानमतिः श्रुणु ॥१२॥
विश्वसाधनमीशानं गुणातीतमजं परम् ।
जगतस्तस्थुषो ह्यात्मा मम मूलं महामुने ॥१३॥
यो देवः सर्वदेवानां ध्येयः पुज्यः सदाशिवः ।
स शिवः स महादेवः शंकरश्च निरन्जनः ॥१४॥
तस्मान्नान्न्यः परोदेवस्त्रिषु लोकेषु विद्यते ।
सर्वग्यः सर्वगः शम्भुः सर्वात्मा सर्वतोमुखः ॥१५॥
पठ्यते सर्ववेदान्ते सिद्धान्ते यो मुनीश्वरैः ।

तस्मिन्भक्तिर्महादेवे मम धातुश्च निर्मला ॥१६॥
महेशः परमं ब्रह्म शान्तः सूक्ष्मः परात्परः ।
सर्बान्तरः सर्वसाक्षी चिन्मयस्तमसः परः ॥१७॥
निर्विकल्पो निराभाशो निःसंगो निरूपद्रवः ।
निर्लेपः पुरुषाध्यक्षो महापुरुष ईश्वरः ॥१८॥
तस्य चेच्छाभवत्पूर्व जगत्स्थित्यन्तकारीणी ।
वामांगादभवत्तस्य सोयं विष्णुरिति स्मृतः ॥१९॥
जनयामास धातारं दक्षिणांगात्सदाशिवः ।
मध्यतो रुद्रमीशानं कालात्मा परमेश्वरः ॥२०॥

तपस्तपन्तु भोवत्सा अब्रवीदिति तान्छिवः ।
ततःस्ते शिवमात्मानं प्रोचु संयतमानसाः ॥२१॥
स्तुत्वा तु विविधैः स्त्रोत्रैः प्रणम्य च पुनः पुनः ।

ब्रह्मविष्णुरुद्रा उचु

तपःकेन प्रकारेण कर्तव्यं परमेश्वरः ॥२२॥
ब्रुहि सर्वमशेषेण स्वात्मानं वेत्सि नापरः ।

शिव उवाच

कायेन मनसा वाचा ध्यानपूजाजपादिभिः ॥२३॥
कामक्रोधादिरहितं तपः कुर्वन्तु भोः सुराः ॥

देवा उचुः

त्वया येत्कथितं शम्भो दुर्गेयमजितात्मभिः ॥२४॥
सौम्योपायमतो ब्रह्मन् वद कारुण्यवारिधेः ।

शिव उवाच

सहस्रनाम सद्विद्यां जपन्तु मम सुव्रताः ॥२५॥
यया संसारमग्नानां भुक्तिर्भवति शास्वति ।
श्रृण्वन्तु तद्विविधानं हि महापातकनासनम् ॥२६॥
पठतां श्रृण्वन्तां सद्यो मुक्तिः स्यादनपायिनि ।
ब्रह्म चारी कृतस्नानः शुद्धवासा जितेन्द्रियः ॥२७॥

भस्मधारी मुनिःमौनी पद्मासनसमन्वितः ।
ध्यात्वा मां सकलाधीशं निराकारं मुनीश्वरम् ॥२८॥
पार्वतीसहितं शर्वं जटामुकुटमण्डितम् ।
बसानं चर्म वैयाघ्रं चन्द्रार्धकृतशेखरम् ॥२९॥
त्र्यम्बकं हि वृषारुढं कृत्तिवाससमुज्ज्वलम् ।
सुरार्चितपदद्वन्दे दिव्यभोगं सुसुन्दरम् ॥३०॥
विभ्राणं सुप्रसन्नं च कुठारं च वराभयम् ।
दुद्धर्षं कमलासीनं नागयज्ञोपवीतिनम् ॥३१॥
विश्वकायं चिदानन्दं शुद्धमक्षरमव्ययम् ।

सहस्रशिरसं शम्भुमनन्तकरसंयुतम् ॥३२॥
सहस्रचरणं दिव्यं सोमसूर्याग्निलोचनम् ।
जगद्योनिमजं ब्रह्म शिवमाद्यं सनातनम् ॥३३॥
द्रंष्टाकरालं दुष्प्रेक्षं सूर्यकोटिसमप्रभम् ।
निशाकरकलाकान्तं भेषजं भवरोगिणाम् ॥३४॥
पिनाकिनं विशालाक्षं पशूनां पतिमीश्वरम् ।
कालात्मानं कालकालं देवदेवं महेश्वरम् ॥३५॥
ज्ञानवैराग्यसम्पन्नं योगानन्दमयं परम् ।
शाश्वतैश्वर्यसपन्नं महायोगीश्वरेश्वरम् ॥३६॥

समस्तशक्तिसंयुक्तं पुण्यकायं दुरासदम् ।
तारकं ब्रह्म संपूर्णमणीयांसं महत्तमम् ॥३७॥
यतीनां परमं व्रह्म यतीनां तपसः फलम् ।
संयमिह्रित्समासीनं तपस्वीजनसंम्पदम् ॥३८॥
विधीन्द्रविष्णुनमितं मुनिसिद्धनिषेवितम् ।
महादेवं महात्मानं देवानामपि दैवतम् ॥३९॥

अथ शिवकवचप्रारम्भ

शान्तं पवित्रमोंकारं ज्योतिषां ज्योतिरुत्तमम् ।
शंकरो मे शिरः पातु ललाटं भाललोचनः ॥४०॥

विश्वचक्षुर्दृशौ पातु रुद्रो मम भ्रुवावपि ।
गण्डौ पातु महेशानः श्रुती रक्षतु पूर्वजः ॥४१॥
कपालौ मे महादेवः पातु नासां सदाशिवः ।
मुखं पातु हविर्भोक्ता ओष्ठौ पातु महेश्वरः ॥४२॥
दन्तान् रक्षतु देवेद्रस्तालु सोमकलाधरः ।
रसानां परमानन्दः पातु गल्लौ शिवाप्रियः ॥४३॥
चिबुकं पातु मे शम्भुः स्मश्रुन् शत्रुविनाशकः ।
कूर्चं पातु भवः कण्ठं नीलकण्ठोऽवतु ध्रुवम् ॥४४॥
स्कन्धौ स्कन्धपतिःर्बाहुं बहुहस्तधरः सदा ।

उपबाहुं महाबर्यः करौ बिबुधसत्तमः ॥४५॥
अङ्गुलीः पातु पञ्चास्यः पर्वाणि च सहस्रपात् ।
ह्रिदयं पातु सर्वात्मा स्तनौपातु पितामहः ॥४६॥
हुतभुक् पातु वस्तिं मे मध्यंमे मध्यमेश्वरः ।
कुक्षौ पातु भवानीश कोष्ठंपातु कुलेश्वरः ॥४७॥
प्राणन् मे प्राणादः पातु नाभिं भीमः कटिं विभुः ।
सक्थिनी पातुमे भर्गो जानूनि जनाकाधिपः ४८॥
जंघे पुररिपुः पातु चरणौ भवनाशनः ।
शरीरं पातु मे शर्वो वाह्यमाभ्यंरं शिवः ॥४९॥

इन्द्रियाणि हरः पातु सर्वत्र जयवर्द्धनः ।
पूर्वे पातु मृडः पातु दक्षिणे मधुसूदनः ॥५०॥
वारुण्यां सलिलाधीस उदीच्यां मे महीधरः ।
ईशान्यां पातु भूतेश आग्नेयां रविलोचनः ५१॥
नैऋत्यां भूतभृत्पातु वायव्यां बलबर्द्धनः ।
ऊर्ध्वं पातु मखद्वेषी अधः संसार नाशनः ॥५२॥
सर्वतः सुखदः पातु बुद्धिं पातु सुलोचनः ।
एवंन्यासा दिकंकृत्वा साक्षात्शम्भुमयो भवेत् ॥५३॥
ॐ नमोहिरण्यवाहवे इति पठेन्मन्त्रं तु भक्तितः ।

नमो हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये । अम्बिकापतये पशुपतये नमो नमः ॥५४॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवे भवे नातिभवे भवस्वमां भवोद्भवाय नमः ॥ वामदेवाय नमो ज्येष्ठाय नमःश्रेष्ठाय नमो रुद्राय नमः ॥५५॥ कालाय नमः कल विकरणाय नमो बल विकरणाय नमो । बलाय नमो बलप्रथनाय नमः । सर्वभूत- दमनाय नमो मनोन्मनाय नमः ॥५६॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः ॥५७॥
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥५८॥
ईशानः सर्वविद्यानांमीश्वरः
सर्वभूतानां ब्रह्माऽधिपति ।
ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो
मेऽस्तु सदा शिवोम् ॥५९॥
सद्योजातादिभिमन्त्रैर्नमस्कुर्यात् सदाशिवम् ।

ततः सहस्र नामेदं पठितव्यं मुमुक्षुभिः ॥६०॥
सर्वकार्यकरं पुण्यं महापातकनाशनम् ।
सर्वगुह्यतमं दिव्यं सर्वलोकहितप्रदम् ॥६१॥
मन्त्राणां परमंमन्त्रं भवदुःखषडूर्मिहृत् ॥

अथ न्यासः ॥

ॐ नमः शिवायेति षडंग न्यासः । ॐ नमः शंवायच ह्रिदयाये नमः ॐ नमो भवाय च शिरसे स्वाहा ॐ नमः शंकरायच शिखायै वषट् ॐ नमो मयस्करायच कवचाय हुम ॐ नमः शिवतराय च

नेत्रत्रयायवौषट् नमः शिवाय शिवतरायच अस्त्राय फट् । नमोस्तुस्थाणुरूपाय ज्योतिलिंगमृतात्मने । चतुर्मूर्तिवपुःस्थाय भूषितांगाय शंभवे । ॐ अस्यश्रीवेदसाराख्यपरमदिव्यशिवसहस्रनाम-स्तोत्र मन्त्रस्य नाराण ऋषिः अनुष्टुप्छन्दः सदाशिवो देवता ॐ नमः इति बीजम् शिवायेति शक्तिः ॐ चैतन्यमिति कीलकम् सदाशिव प्रीत्यर्थे जपे विनियोगः ।

अथ ध्यानम्

कोटिसूर्यप्रतीकाशं त्रिनेत्रं चन्द्रशेखरम् ।
शूलटंकगदाचक्रकुंतपाशधरं विभुम् ॥६३॥

अथ श्रीवेदसाराख्यपरमदिव्यशिवसहस्रनामप्रारंभ

ॐ नमः पराय देवाय शंकराय महात्मने ।
कामिने नीलकण्ठाय निर्मलाय कपर्दिने ॥१॥
निर्विकल्पाय शान्ताय निरहंकारिणे नमः ।
अनर्घ्याय विशालाय शूलहस्ताय ते नमः ॥२॥
निरंजनाय सर्वाय निःशंकाय परात्मने ।
नमः शिवाय भर्गाय गुणतीताय वेधसे ॥३॥

महादेवाय पीताय पार्वतीपतये नमः ।
कैवल्याय महेशाय विशुद्धाय बुधात्मने ॥४॥
कैवल्याय सुधेशाय निस्पृहाय सुरूपिणे ।
नमः सोमाय भूताय कालायामिततेजसे ॥५॥
अजराय जगपित्रे जनकाय पिनाकिने ।
निराधाराय सिंहाय मायातीताय ते नमः ॥६॥
बिजाय सर्वभूताय पशूनां पतये नमः ।
पुरन्दराय भद्राय पुरुषाय महीयसे ॥७॥
महासन्तोषरूपाय ज्ञानिने शुद्धवुद्धये ।

बुद्धाय बहुरूपाय ताराय परमात्मने ॥८॥
पूर्वजाय सुरेशाय ब्रह्मणेऽनन्तमूर्तये ।
निरक्षराय सूक्ष्माय कैलाशपतये नमः ॥९॥
निरामयाय कान्ताय निराकाराय ते नमः ।
सलिलात्मस्वरूपाय सोऽहं तत्वाय ते नमः ॥१०॥
निरालम्बाय नित्याय नित्यायाः पतये नमः ।
आत्मारामाय कव्याय पूज्याय परमेष्ठिने ॥११॥
विकर्तनाय भीमाय शंभवे विश्वरूपिणे ।
हंसाय हंसनाथाय प्रसिद्धाय नमो नमः ॥१२॥

परात्पराय रुद्राय भवायालङ्घ्यशक्तये ।
इन्द्रहन्त्रे निधीशाय कालहन्त्रे नमस्विने ॥१३॥
विश्वमात्रे जगद्धात्रे जगन्नेत्रे नमो नमः ।
जटिलाय विरोगाय पवित्राय मृडाय च ॥१४॥
निरवद्याय धीराय निरतङ्काय ते नमः ।
नादाय रविनेत्राय व्योमकेशाय ते नमः ।
चतुर्भोगाय साराय योगिनेनऽन्तमायिने ॥१५॥
धर्मिष्ठाय वरिष्ठाय पुरत्रयविघातिने ।
गरिष्ठाय गिरीशाय वरदाय नमो नमः ॥१६॥

व्याघ्रचर्माम्बरायाथ दिशावस्त्राय ते नमः ।
परमार्थाय मात्राय प्रथमाय स्वचक्षुसे ॥१७॥
आद्याय शूलहस्ताय शितिकण्ठाय तेजसे ।
उग्राय बामदेवाय श्रीकण्ठाय च ते नमः ॥१८॥
विश्वेश्वराय सूर्याय गौरीशाय वराय च ।
मृत्युञ्जयाय वीराय वीरभद्राय ते नमः ॥१९॥
विरूपाक्षाय विधये बन्हिनेत्राय ते नमः ।
जालन्धरशिरश्छेत्रे हविषे हितकारिणे ॥२०॥
महाकालाय वैद्याय घुसृणेशाय ते नमः ।

नमः ॐ काररूपाय सोमनाथाय ते नमः ॥२१॥
रामेश्वराय शुचये भीमेशाय नमो नमः ।
त्र्यम्बकाय निरीहाय केदाराय नमो नमः ॥२२॥
गङ्गाधराय कवये नागनाथाय ते नमः ।
भीमप्रियाय महसे रश्मीशाय नमो नमः ॥२३॥
पूर्णाय भूतपतये सर्वज्ञाय दयालवे ।
धर्माय धनदेशाय गजचर्माम्बराय च ॥२४॥
भालनेत्राय यज्ञाय श्रीशैलपतये नमः ।
कृशानुरेतसे नीललोहिताय नमो नमः ॥२५॥

अन्धकासुरहंत्रे च पावनाय वलाय च ।
चैतन्याय त्रिनेत्राय दक्षनाशकराय च ॥२६॥
नमः सहस्रशिरसे जयरूपाय ते नमः ।
सहस्रचरणायाथ योगिहृत्कुञ्जवासिने ॥२७॥
सद्योजाताय वन्द्याय सर्वदेवमयाय च ।
आमोदाय प्रगल्भाय गायत्रीबल्लभाय च ॥२८॥
व्योमकाराय विप्राय नमो विप्रप्रियाय च ।
अघोराय सुवेशाय श्वेतरूपाय ते नमः ॥२९॥
विद्वत्तमाय वक्राय विश्वग्राशाय नन्दिने ।

अधर्मशत्रवे तापद्वन्द्वभिमथनाय च ॥३०॥
अजातशत्रवे तुभ्यं जगत्प्राणाय ते नमः ।
नमो ब्रह्मशिरश्छेत्रे पञ्चवक्त्राय खड्गिने ॥३१॥
हरिकेशाय विभवे पञ्चवर्णाय वज्रिणे ।
नमः पञ्चाक्षरायाथ गोवर्द्धनगताय च ॥३२॥
प्रभवे जनवीजाय कालकूटविषादिने ।
सिद्धेश्वराय सिद्धाय सहस्रनयनाय च ॥३३॥
नमः सहस्रहस्ताय सहस्रनयनाय च ।
सहस्रमूर्तये तुभ्यं विष्णवे जितशत्रवे ॥३४॥

काशीनाथाय गोप्त्रे ते नमस्ते विश्वसाक्षिणे ।
हेतवे सर्वजीवानां पालकाय नमो नमः ॥३५॥
जगत्संहारकाराय त्रिधावस्थाय ते नमः ।
एकादशस्वरूपाय नमस्ते बहुमूर्तये ॥३६॥
नरसिंहमहादर्पघातिने शरभाय च ।
भस्माभ्यक्ताय तीर्थाय जान्हवीजनकाय च ॥३७॥
देवदानवदैत्यानां गुरवे ते नमो नमः ।
दलिताञ्जनभासाय नमो वायुस्वरूपिणे ॥३८॥
नमः स्वच्छस्वरूपाय प्रसिद्धाय नमो नमः ।

वृषध्वजाय गोष्ठ्याय जगद्यन्त्रप्रवर्तिने ॥३९॥
अनाथाय व्रजेशाय विष्णुगर्वहराय च ।
हरिर्विधातृकलहनाशकाय नमो नमः ॥४०॥
गदाहस्ताय वटवे गगनाय नमो नमः ।
कैवल्यफलदात्रे ते परमाय नमो नमः ॥४१॥
ज्ञानगम्याय ज्ञानाय घंटारवप्रियाय च ।
पद्मासनाय पुष्टाय निर्वाणाय नमो नमः ॥४२॥
अयोनये सदेहाय ह्युत्तमाय नमो नमः ।
अन्तकालाधिपतये विशालाक्षाय ते नमः ॥४३॥

कुवेरवन्धवे तुभ्यं सोमाय सुखिने नमः ।
अमृतेशाय सौम्याय खेचराय च धन्विने ॥४४॥
प्रियम्बदाय दक्षाय वन्दिने विभवाय च ।
गीरीशाय गिरित्राय गिरिशान्ताय ते नमः ॥४५॥
पारिजाताय वृहते पञ्चयज्ञाय ते नमः ।
तरुणाय विशिष्टाय बालरूपधराय च ॥४६॥
जीवितेशाय पुष्टाय पुष्टानां पतये नमः ।
भवहेत्यै हिरण्याय कनिष्ठाय नमो नमः ॥४७॥
मध्यमाय विधात्रे च शूराय सुभगा यच ।

आदित्यतापनाथाय पुण्यश्लोकाय ते नमः ॥४८॥
महाह्रदाय ह्रस्वाय वामनाय नमोनमः ।
नमस्तत्पुरुसायाथ चतुर्हस्ताय मायिने ॥४९॥
नमो धुर्जटये तुभ्यं जगदीशाय ते नमः ।
जगन्नाथय महसे लीलाविग्रहधारिणे ॥५०॥
अभयाय नमस्तुभ्यममराय नमो नमः ।
अताम्राय नमस्तुभ्यमक्षयाय नमो नमः ॥५१॥
लोकाध्यक्ष नमस्तुभ्यमनादिनिधनायच ।
व्यक्तोत्तराय व्यक्ताय नमस्ते परमाणवे ॥५२॥

लघवे थूलरूपाय नमः परशुधारिणे ।
नमः खट्वाङ्गहस्ताय नागहस्ताय ते नमः ॥५३॥
वरदाभयहस्ताय घण्टाहस्ताय ते नमः ।
घश्मराय नमस्तुभ्यमजिताय नमो नमः ॥५४॥
अणिमादिगुणेशाय पञ्चब्रह्ममयाय च ।
पुरातनाय शुद्धाय बलप्रमथनाय च ॥५५॥
पुण्योदयाय पद्माय विमुक्ताय नमो नमः ।
उदराय विचित्राय विचित्रगतये नमः ॥५६॥
बाग्विशुद्धाय चितये निर्गुणाय नमो नमः ।

परमेशाय शेषाय नमः परतराय च ॥५७॥
महेन्द्राय सुशीलाय करविरपृयायच ।
महापराक्रमायाथ नमस्ते कालरूपिणे ॥५८॥
विष्ठरश्रवसे लोकचुडारत्नाय ते नमः ।
सम्म्राज्य कल्पवृक्षाय करुणाय नटाय च ॥५९॥
अनर्घ्याय वरेण्याय बज्ररूपाय ते नमः ।
परमज्योतिषे पद्मगर्भाय सलिलाय च ॥६०॥
तत्वाधिकाय तत्त्वाय नमो दीर्घाय रङ्गिणे ।
नमस्ते पाण्डुरंगाय गौराय ब्रह्मचारिणे ॥६१॥

अणवे निस्कलायाथ सामगानप्रियाय च ।
नमोऽक्षयाय क्षेत्राय नमस्ते पुण्यमूर्तये ॥६२॥
कलाधराय पूज्याय पञ्चभूतात्मने नमः ।
निर्वाणाय च तथ्याय पापनाश करायच ॥६३॥
विश्वतश्चक्षुषे कालयोगिनेऽनन्तरूपिणे ।
सिद्धसाधकरूपाय नमो मेदिनीरूपिणे ॥६४॥
अगण्याय प्रतापाय सुधाहस्तायते नमः ।
श्रीबल्लभाय निधये स्थावणे मधुराय च ॥६५॥
उपाधिरहितायाथ नमः सुकृतराशये ।

नमो मुनिश्वरायाथ शिवानन्दाय ते नमः ६६॥
रिपुघ्नाय नमस्तेजोराशयेनुत्तमायच ।
चतुमूर्तिर्वपुः स्थाय नमो बुद्धीन्द्रियात्मने ॥६७॥
उपद्रबहरायाथ प्रियसंदर्शनायच ।
भूतनाथाय मूताय वितरागाय ते नमः ॥६८॥
नैस्कर्म्याय निरूपाय षड्वक्राय विशुद्धये ।
कुलेशाय भूतभृते भुवनेशाय ते नमः ॥६९॥
हिरण्यबाहबे जीववरदाय नमो नमः ।
आदिदेवाय भर्गाय चन्द्रसञ्जीवनाय च ॥७०॥

हराय बहुरूपाय प्रसन्नाय नमो नमः ।
आनन्दभरितायाथ कूटस्थाय नमो नमः ॥७१॥
नमो मोक्षफलायाथ शाश्वताय विरागिणे ।
यज्ञभोक्त्रे सुषेणाय दक्षयज्ञविघातिने ॥७२॥
नमः सर्वात्मने तुभ्यं विश्वपालाय ते नमः ।
विश्वगर्भाय गर्भाय वेदगर्भाय ते नमः ॥७३॥
संसारार्णवमग्नानां दुःखसंसारसेतवे ।
मुनिप्रियाय जीवाय मूलप्रकृतये नमः ॥७४॥
समस्तवन्धवे तेजोमूर्तये ते नमो नमः ।

आश्रमस्थापकायाथ वर्णिने सुन्दराय च ॥७५॥
मृगवाणार्पणायाथ शारदावल्लभायच ।
विचित्रमायिने तुभ्यमलंकारिष्णवे नमः ॥७६॥
बहिर्मुखमहादर्पमथनाय नमो नमः ।
नमोऽष्टमूर्तये तुभ्यं निष्कलंकाय ते नमः ॥७७॥
नमो हव्याय भोज्याय यज्ञनाथाय ते नमः ।
नमो मध्याय मुख्याय वशिष्ठाय नमो नमः ॥७८॥
अम्बिकापतये तुभ्यं महादन्ताय ते नमः ।
सत्यपृयाये सत्याय प्रियनृत्याय ते नमः ॥७९॥

नित्यतृप्तय वेदित्रे मृगहस्ता यते नमः ।
अर्धनारीश्वरायाथ कुठारायुतपाणये ॥८०॥
बराभयेप्रदात्रे ते बहुरूपाय ते नमः ।
महार्थाय सुसत्वाय कीर्तिस्तंभाय ते नमः ॥८१॥
नमः कृतागमायाथ वेदान्तपठिताय च ।
अश्रोत्राय श्रुतिमते वहुश्रुतितराय च ॥८२॥
अव्रणाय नमस्तुभ्यं गन्धाया ग्रहकारिणे ।
पादहीनाय बोढाय सर्वत्रगतये नमः ॥८३॥
अक्षाय जननेत्राय नमस्तुभ्यं चिदात्मने ।

रसज्ञाय नमस्तुभ्यं रसनारहिताय च ॥८४॥
अमूर्तायाथ मूर्ताय सदसस्पतये नमः ।
जितेन्द्रियाय तथ्याय परंज्योतिः स्वरूपिणे ॥८५॥
नमस्ते सर्वमर्त्यानामादिकर्त्रे दयालवे ।
सर्गस्थितिविनाशानां कर्त्रे ते प्रेरकाय च ॥८६॥
नमोऽन्तर्यामिणे सर्वहृदिस्थाय नमो नमः ।
चक्रभ्रमणकर्त्रे ते पुराणाय नमो नमः ॥८७॥
वामदक्षिणपार्श्वाय लोकेशहरिशालिने ।
नमः सकलकल्याणदायिने प्रशवाय च ॥८८॥

स्वभासे मारधीराय सूत्रकाराय ते नमः ।
पिषयार्णवमग्नानां समुद्धरणसेतवे ॥८९॥
अस्नेहस्नेहरूपाय वार्तातिक्रान्तवर्तिने ।
यत्र सर्वं यतः सर्वं सर्वं यत्र नमो नमः ॥९०॥
नमो महार्णवायाथ भास्कराय नमो नमः ।
भक्तिगम्याय भक्तानां सुलभाय नमो नमः ॥९१॥
दुष्प्रधर्षाय दुष्टानां विज्ञयाय विवेकिनाम् ।
अलौकिकाय लोकाय ह्यलोकाय नमो नमः ॥९२॥
पुरयित्रे विशेषाय कुशलाय शुभाय च ।

नमः कर्पुरगौराय सर्पहाराय ते नमः ॥ ९३॥
नमः संसारपाराय कमनीयाय ते नमः ।
वन्हिदर्पविघाताय वायुदर्पविघातिने ॥९४॥
जरातीगाय वीर्याय वेद्याय व्यापिने नमः ।
सूर्यकोटिप्रकाशाय निष्कृयाय नमोनमः ॥९५॥
चन्द्रकोटिसुशीताय कपिलाय नमो नमः ।
नमो गुडस्वरूपाय निश्चलाय पराय च ॥९६॥
नमः सत्यप्रतिज्ञाय नमस्ते सुसमाधये ।
एकरूपाय शुन्याय विश्वनाभिह्रदाय च ॥९७॥

पूर्वोत्तमाय लोकाय प्राणाय सुहृदे नमः ।
नमः परापरायाथ चिन्मात्राय नमो नमः ॥९८॥
ध्यानगम्याय धेयाय ध्यानरूपाय ते नमः ।
नमस्ते शाश्वतैश्वर्य विभवाये नमो नमः ॥९९॥
नमः प्राणेश्वरायाथ सर्वशक्तिधराय च ।
धर्माधाराय धन्याय पुष्कलाय नमो नमः ॥१००॥
प्रतिष्ठायै धर्मगोप्त्रे निधनायप्रजाय च ।
योगेश्वराय योगाय योगगम्याय ते नमः ॥१०१॥
महेन्द्रोपेन्द्रचन्द्रार्कनमिताय नमो नमः ।

महर्षिवन्दितायाथ प्रकाशाय सुधर्मिणे ॥१०२॥
नमो हिरन्यगर्भाय नमो हिरण्यमाय च ।
जगद्वीजाय हाराय सेव्याय क्रतव्ये नमः ॥१०३॥
आधिपत्याय कामायस्वराय यशसे नमः ।
नमः प्रचेतसे ब्रह्ममयाय शकलाय च ॥१०४॥
नमस्ते रुक्मवर्णाय नमस्ते व्रह्मयोनये ।
योगात्मनेऽचिन्तिताय दिव्यनृत्याय ते नमः ॥१०५॥
जगतामेक नाथाय मायाविजायते नमः ।
सर्वहृत्सन्निविष्टाय व्रह्मचक्रभ्रमायच ॥१०६॥

व्रह्मानन्दाय भवते व्राह्मणाय नमो नमः ।
भूमिभारार्तिसंहर्त्रे भवसारथये नमः ॥१०७॥
हिरण्यगर्भपुत्राणां प्राणसंरक्षणाय च ।
दुर्वाससे षड्विकाररहिताय नमो नमः ॥१०८॥
नमो देहार्धकान्ताय षडूर्मिरहिताय च ।
प्रकृत्यै भवनाशाय ताम्राय परमेष्ठिने ॥१०९॥
अननन्तकोटीव्रह्माण्डनायकाय नमो नमः ।
एकाकिने निर्मलाय द्रविणाय दमायच ॥११०॥
नमस्त्रिलोचनायाथ शिपिविष्टाय बन्धवे ।

त्रिविष्ठपेश्वरायाथ नमो ब्याघ्रेश्वराय च ॥१११॥
विश्वेश्वराय दात्रे ते नमश्चण्डेश्वराय च ।
व्यासेश्वराय बुधिने कण्डुकेशाय ते नमः ॥११२॥
योगेश्वराय च नमो दिवोदाशेश्वराय च ।
नागेश्वराये न्यायाय न्यायनिर्वाहकाय च ॥११३॥
शरण्याय सुपात्राय कालचक्रप्रवर्तिने ।
विचक्षणाय द्रंष्टाय श्वेताश्वाय नमो नमः ॥११४॥
नीलजीभूतदेहाय परात्मज्योतिषे नमः ।
शरणागतपालाय महाबलपराय च ॥११५॥

सर्वपापहरायाथ महानादाय ते नमः ।
कृष्णस्य जयदात्रे ते विल्वकेशाय ते नमः ॥११६॥
दिव्यभोगाय दण्डाय को विदाय नमो नमः ।
कामपालाय चित्राय विचित्राय नमो नमः ॥११७॥
नमो मातामहायाथ नमस्ते मातरिश्वने ।
निःसंगाय सुनेत्राय विघ्नेशाय जयाय च ॥११८॥
व्याजसंमर्दनायाथ मध्यस्थाय नमो नमः ।
अंगुष्ठशिरसा लंकानाथदर्पहराय च ॥११९॥
व्याघ्रपुरनिवासाय नमः सर्वेश्वराय च ।

नमः परावरेशाय जगत्स्थावरमूर्तये ॥१२०॥
नमोऽप्यणुप्रमेयाय शार्ङ्गिणे विष्णुमूर्तये ।
नारायणाय वामाय सुदिप्ताय नमो नमः ॥१२१॥
नमो ब्रह्माण्डमालाय गोधराय बरूथिने ।
घण्टानादय सूत्राय नमः पातालबासिने ॥१२२॥
नमस्ताराधिनाथाय वागिशाय नमो नमः ।
सदाचाराय गौराय पुराणपुरूषाय च १२३॥
संसारमोचकायाथ वर्णिने लिंगरूपिणे ।
सच्चिदानन्दरूपाय पापराशिहराय च १२४॥

अतर्क्यायप्रमेयाय प्रमाणाय नमो नमः ।
कलिग्रासाय भक्तानां भुक्तिमुक्तिप्रदायिने १२५॥
गजारये विदेहाय त्रिलिङ्गरहिताय च ।
नमो राजधिराजाय चैतन्यविभवाय च ॥१२६॥
नमः शुद्धात्मने ब्रह्म ज्योतिषे स्वस्तिदा यच ।
मयोभवे च दुर्ज्ञाय सामर्थाय च यज्वने ॥१२७॥
क्षत्रेस्वराय रुचये नमो नक्षत्रमालिने ।
अनर्थनाशकायाथ भस्मलेपकराय च ॥१२८॥
सदानन्दाय विदुषे सुगुणाय विरोधिने ।

दुर्गमाय सुभाङ्गाय मृगब्याधाय ते नमः ॥१२९॥
प्रियाय धर्मधाम्ने ते प्रयागाय विभागिने ।
आद्यायामृतपानाय सोमपाय तपस्विने ॥१३०॥
नमो विचित्रवेषाय पुष्ठिसम्वर्द्धनाय च ।
चिरन्तनाय धनुषे स्थविराय ध्रुवाय च ॥१३१॥
नियमायाग्रगण्याय व्योमातीताय ते नमः ।
संवत्सराय लोप्याय स्थानदाय स्थविष्णवे ॥१३२॥
व्यवसाय फलान्ताय महाकर्त्रे प्रियाय च ।
गुणत्रयस्वरूपाय नमः सिद्धरूपिणे ॥१३३॥

नमो नमःस्वरूपाय स्वच्छाय पुरुषाय च ।
कालान्तराय वेदाय नमो ब्रह्माण्डरूपिणे ॥१३४॥
अनित्यनित्यरूपाय तदन्तर्वर्त्तिने नमः ।
समस्तार्थाय कूल्याय पुण्यय पटवे नमः ॥१३५॥
पञ्चतन्मात्ररूपाय पञ्चकर्मेन्द्रियात्मने ।
विश्रृंखलाय पूर्णाय नमस्ते विषयात्मने ॥१३६॥
अनवद्याय शस्त्राय स्वतन्त्रायमृताय च ।
नमः प्रौढाय प्राज्ञाय योगारूढाय ते नमः ॥१३७॥
मंत्रज्ञाय प्रभावाय प्रदीपविमलाय च ।

विश्वपाशाय दक्षाय वेदःनिःश्वसिताय च ॥१३८॥
यज्ञाङ्गाय सुवीराय नागचूडाय ते नमः ।
ब्याधाय वाणहस्ताय स्कन्दाय पक्षिणे नमः ॥१३९॥
क्षेत्रज्ञाय रहस्याय स्वस्थाय च वरीयसे ।
गहनाय विरामाय सिद्धान्ताय नमो नमः ॥१४०॥
महीधराय होत्रे ते वटवृक्षाय ते नमः ।
ज्ञानदीपाय दुर्गाय सिद्धान्तर्निश्चितायच ।
श्रीमते मुक्तिवीजाय कुशलाय विलासिने ॥ १४१॥
प्रेरकाय विशोकाय हविर्द्धानाय ते नमः ।

गंभीराय सहायाय भोजनाय सुभोगिने ॥१४२॥
महायज्ञाय तीक्ष्णाय नमस्ते भूतचारिणे ।
नमः प्रतिष्ठितायाथ महोत्साहाय ते नमः
॥१४३॥ परमार्थाय शिशिरे प्रांशवे च कपालिने ।
सहजाय गृहस्थाय संध्यानाथाय जिष्णवे ॥१४४॥
सङ्भिः सुपूजितायाथ वितला सुरघातिने ।
जनानन्दाय योग्याय कायेशाय किरीटिने ॥१४५॥
अमोघविक्रमायाथ नग्नाय दलघातिने ।
संग्रामाय नरेशाय शुचिहास्यय ते नमः ।

भूति प्रियाय भूम्ने ते श्येनाय मधुराय च ॥१४६॥
मनुष्यवाह्यगतये कृतज्ञाय सिखण्डिने ।
निर्लेपाय जटार्द्राय महाकालाय भीरवे ॥१४७॥
नमो विरूरूपाय शक्तिगम्यायते नमः ।
नम शर्वाय सदसत्पराय सुव्रताय च ॥१४८॥
नमो भक्तिप्रियायाथ श्वेतरक्षापराय च ।
सुकुमारमहापापहराय रथिने नमः ॥१४९॥
नमस्ते धर्मराजाय धनाध्यक्षाय सिद्धये ।
महाभूताय कल्पाय कल्पनारहिताय च ॥१५०॥

ख्याताय जितविश्वाय गोकर्णाय सुचारवे ।
श्रोत्रियाय वदान्याय दुर्वलाय कुटुम्विने ॥१५१॥
विराजाय सुगन्धाय नमो विश्वम्भराय च ।
भवातीताय षष्ठाय नमस्ते सामगाय च ॥१५२॥
अद्वैताय द्वितियाय कल्पराजाय भोगीने ।
चिन्मयाय नमः शुक्लज्योतिषे क्षेत्रगाय च ॥१५३॥
सर्वभोगसमृद्धाय साम्बाय च नमो नमः ।
नमस्ते स्वप्रकाशाय स्वच्छन्दाय सुतन्तवे ॥१५४॥
सर्वज्ञमूर्तये तुभ्यं हिरण्यरेतसे नमः ।

शारदाय सुशीलाय कौशिकाय धनाय च ॥१५५॥
अभिरामाय तत्वाय व्यक्त कल्पाय ते नमः ।
अरिष्टमथनायाथ सुप्रतीकाय ते नमः ॥१५६॥
प्रांशवे व्रम्हगर्भाय वरुणायेन्दवे नमः ।
नमः कालाग्निरुद्राय श्यामाय सुजनाय च ॥१५७॥
अहिर्वुध्न्यायाजराय गुह्येशाय सुशान्तये ।
नमः समयनाथाय सोमयाय गुहाय च ॥१५८॥
निर्मलाय नमस्तुभ्यं छन्दः साराय दंष्ट्रिणे ।
ज्योतिर्लिंगाय पित्रे च जगत्सुहितकारिणे ॥१५९॥

नमः कारुण्यनिधये श्लोकाय जयशालिने ।
ज्ञानोदयाय वीजाय जनविश्रामहेतवे ॥१६०॥
अवधूताय शिष्टायछन्दसां प्रभवे नमः ।
नमः फेण्याय गुह्याय सर्वबन्धविमोचने ॥१६१॥
उदारकीर्तये शश्वत्प्रशन्नवदनाय च ।
वसवे वेदकाराय नमो भ्राजिष्णुविष्णवे ॥१६२॥
चक्रिणे देवदेवाय गदाहस्ताय पत्रिणे ।
नमस्ते पारिजाताय गणाधिपतये नमः ॥१६३॥
सर्वशाखाधिपतये प्रजनेशाय ते नमः ।

सूक्ष्मप्रमाणभूर्ताय सुरपार्श्वगता यच ॥१६४॥
अशरीराय शुक्राय सर्वान्तर्यामिणे नमः ।
सुकेशाय सुपुष्पाय श्रुतये पुष्पमालिने ॥१६५॥
मुनिध्येयाय मुनये वीजस्थाय मरीचये ।
चामुण्डजनकायाथ नमस्ते कृत्तिवासने ॥१६६॥
व्योमकेशाय योग्याय धर्मपीठाय ते नमः ।
महावीर्याय दीप्ताय वुद्धाया शनये नमः ॥१६७॥
शिष्टेष्टाय मघवते केतवे करुणाय च ।
कारणाय भगवते वाणदर्पहराय च ॥१६८॥

अतीन्द्रियाय रम्याय ज्ञानानन्दकराय च ।
सदाशिवाय धौम्याय चिन्त्याय चन्द्रमौलिने ॥१६९॥
नमस्ते जातुकर्ण्याय सूर्याध्यक्षाय ते नमः ।
ज्योतिषे कुंडलीशाय वरदायाचलाय च ॥१७०॥
वसन्ताय सुरभये जयारिमथनाय च ।
प्रेतपुरञ्जयायाथ पृषदश्वाय ते नमः ॥१७१॥
रोचिष्णवे सुरजिते श्वेतपीताय ते नमः ।
नमस्ते चंचरीकाय तामिश्रमथनाय च ॥१७२॥
प्रमाथिने निदाघाय चित्रगर्भाय ते नमः ।

शिवालयाय स्तुत्यायतीर्थदेवाय ते नमः ॥१७३॥
निरवद्याय दानाय विचित्रशक्तये नमः ।
नमस्तूल्याय महसे वितानपतये नमः ॥१७४॥
अहंकारस्वरूपाय मेधाधिपतये नमः ।
विक्रमाय स्वतन्त्राय स्वतन्त्रगतये नमः ॥१७५॥
अपाराय तत्वविदे यक्षद्वीरायते नमः ।
पंचास्याय वदान्याय विश्वप्राणेश्वरा यच ॥१७६॥
अगोचराय सूक्ष्मायज्ञेयाय वडवाग्नये ।
फेन्याय पद्महस्ताय नमस्ते जमदग्नये ॥१७७॥

अनावृत्ताय मुक्ताय मातृका पतये नमः ।
नमस्ते वीजकोशाय तिव्रानन्दाय मुक्तये ॥१७८॥
नमस्ते विश्वदेवाय शान्तरागाय ते नमः ।
विलोचनाय तोयाय हेमगर्भाय ते नमः ॥१७९॥
अनाद्यन्ताय चण्डाय मनोनाथाय ते नमः ।
ज्ञानस्कन्दाय तुष्टाय कपिलाय महर्षये ।१८०॥
नमस्त्रिकाग्निकालाय देवसिंहाय ते नमः ।
नमस्ते मणिपुराय चतुर्वेदाय ते नमः ॥१८१
स्वभावाय सुभासाय ह्यन्तरंगा यतेनमः ।

नमस्ते शिवधर्माय महाधर्मायते नमः ॥१८२॥
प्रसन्नाय नमस्तुभ्यंसर्वात्मज्योतिषे नमः ।
स्वयंभुवे कुलेशाय यक्षराक्षसमन्महे ॥१८३॥

श्रीमहादेव उवच

जपन्तु सततं देवा नाम्नां दशशतीमिमाम् ।
मम चातिप्रियकरीं महामोक्षप्रदायिनीम् ॥१८४॥
संग्रमे जयदात्री च सर्वसिद्धिमयीं शुभाम् ।
यः पठेच्छृणुयाद्वाऽपि सर्वपापैः प्रमुच्यते ॥१८५॥
पुत्रकामो भवेत्पुत्रं साज्यकामस्तु राज्यताम् ।

प्राप्नुयात्परया भक्त्या धनधान्यादिकं बहु ॥१८६॥
शिवालये नदीतीरेऽश्वत्थमूले विशेषतः ।
प्रजपेत्सिद्धिदां देवाः शुचौ देशे शमीतले ॥१८७॥
धनकमस्तु जुहुयात्घृताक्तैर्विल्वपत्रकैः ।
मोक्षकामस्तु गव्येन घृतेन प्रतिनामतः ॥१८८॥
पुत्रकामस्तु जुहुयात् तिलाक्तेन तथान्धसा ।
आयुः कामस्तु जुहुयादाज्येन मधुना तथा ॥१८९॥
मत्समीपे प्रदोषे च स्पृष्ट्वा भक्त्या जपत्यथ ।
जीवन्सरूपतो प्रेत्य सायुज्यं सममाप्नुयात् ॥१९०॥

कालोऽपि जनशास्ता हि मम भक्तं न लुम्पति ।
अहमीशः सुराः कस्य नेष्यामि गतकल्मषम् ॥१९१॥
त्रिसन्ध्यासु जपेत् भक्त्या वत्सरं नियमान्वितैः ।
मच्चितो मन्मना भूत्वा सर्वरोगैः प्रमुच्यते ॥१९२॥
रुद्रपाठेन यत्पुण्यं यत्पुण्यं वेदपाठतः ।
तत्सर्वं प्राप्यते पुंभिरेकाग्रमनसनसाऽमरा ॥१९३॥
कन्याकोटिप्रदानस्य यत्फलं लभते नरः ।
कपिलाशतदानस्य तत्फलं पठनाद् भवेत् ॥१९४॥

श्रीवेदव्यास उवाच

अश्वमेध सहस्रस्य यत्फलं लभते नरः ।
कपिला कोटिदानस्य तत्फलं पठनात् भवेत् ॥१९५॥
यः श्रुणोति महाविद्यां श्रावयेद्वापि भक्तितः ।
सोऽपि मुक्तिमवाप्नोति यत्र गत्वा न शोचति
॥१९६॥ यक्षराक्षसवेतालग्रहकुष्माण्डभैरवाः ।
पठनादस्य नश्यन्ति जिवेच्च शरदां शतम् ॥१९७॥
ब्रह्महत्यादिपापानां नांस्याद्श्रवणेनच ।
किं पुनः पठनादस्य मुक्तिः स्यादनपायिनी ॥१९८॥
इत्युक्त्वा स महादेवो भगवान् परमेश्वरः ।

पुनरप्याह भगवान्क्रिपया परया युतः ॥१९९॥
दीयतामात्मभक्तेभ्यो यदुक्तं भवघातकम् ।
इत्युक्त्वान्तर्दधे देव परमानन्दरुपवान् ॥२००॥

श्रीकृष्ण उवाच

एतदेव पुरा रामो लब्धवान्कुंभसंभवात् ।
अरण्ये दण्डकारण्ये प्रजजाप रघूद्वह ॥२०१॥
नित्यं स्त्रिषवणस्नायि त्रृसन्ध्यंसंस्मरञ्शिवम् ।
तदाऽसौ देवदेवोऽपि प्रत्यक्षं प्राह राघवम् ॥२०२॥
इदंपशुपतं दिव्यं प्रगृहाण रघूद्वहः ।

एतदासद्य पौलस्यं जहि मा शोकमर्हसि ॥२०३॥
तदाप्रभृति भो देवा प्रजपामि सुभक्तितः ।
गृह्णन्तु परया भक्त्या भवन्तः सर्व एव हि ॥२०४॥

श्रीवेव्यास उवाच

ततस्ते ऋषयः सर्वे जगृहुर्मुनिपुंगवाः ।
सहस्रनामसद्विद्यां भक्तियुक्तेन चेतसा ॥२०५॥
एतद्व कथितं सर्वं हितार्थं मुनिसत्तमा ।
गृणन्तु मम वाक्येन मुक्तिं प्राप्स्यथ निश्चितम् ॥२०६॥
भवद्भिरात्मशिष्येभ्यो दीयतामिदमादरात् ।

नाम्नां सहस्रमेतद्धि लिखितं यन्निकेतने ॥२०७॥
अविमुक्तं तु तद्गेहं तत्र निष्ठति शङ्करः ।
अनेन मन्त्रितं भस्म दुष्टदुखविधातकम् ॥२०८॥
पिसाचस्य विनाशाय जप्तव्यमिदमुत्तमम् ।
नाम्नां तेन सहस्रेण समं किञ्चिन्न विद्यते ॥२०९॥

ॐ इति श्रीपद्मपुराणे उत्तरखण्डे शंकरसंसंहितायाम् श्रीकृष्णकार्मण्डेय-सम्वादे वेदसाराख्य परमदिव्य शिवसहस्रनाम स्तोत्रम् संपूणम्

लेखकः कृष्ण प्रशाद आचार्य भक्तपुर सूर्य विनायक
शुद्धगरेको २०७८। माघ ३गते मा